International Journal of Sanskrit Research 2021; 7(5): 80-84

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(5): 80-84
© 2021 IJSR
www.anantaajournal.com
Received: 16-07-2021
Accepted: 20-08-2021

**अनिन्द्यचौधुरी**
सहायकाध्यापक, संस्कृतविभा
गौडवङ्गविश्वविद्यालय,
मालदा, पश्चिमवङ्गः भारत

**Corresponding Author:**
**अनिन्द्यचौधुरी**
सहायकाध्यापक, संस्कृतविभा
गौडवङ्गविश्वविद्यालय,
मालदा, पश्चिमवङ्गः भारत

# क्षीरतरङ्गिणीमाधवीयाधातुवृत्तिग्रन्थयोरालोकेनात्मनेपदिधातोर्धात्वर्थवैसादृश्यम्

**अनिन्द्यचौधुरी**

**निर्यासः –**
प्रबन्धे इह मया क्षीरतरङ्गिणी-माधवीयधातुवृत्त्योरालोकेन आत्मनेपदिधातूनां धात्वर्थवैसादृश्यम् आलोचितम्। दिङ्मात्रोदाहरणेन विषयः अयं स्पष्टीक्रियते। आचार्यसायणस्तु "राघृ-लाघृ-द्राघृ-सामर्थ्ये" इति धातुसूत्राद् अव्यवहितमनन्तरमेव "द्राघृ आयामे च" इति धातुसूत्रस्य पाठं कृतवान्। "द्राघृ आयामे च" इति धातुसूत्रस्थस्य चेति शब्देन पूर्वधातुसूत्रस्थितसामर्थरूपधात्वर्थो द्योत्यते।

भ्वादिगणीयाद् आत्मनेपदिद्राघृधातोः सामर्थ्यम् आयामश्चेत्यर्थः। पाणिनीयधातुपाठे "राघृ लाघृ द्राघृ सामर्थ्ये । ध्राघृ इत्यपि केचित्। द्राघृ आयामे च" इत्याकारेणापि पाठः प्राप्यते। अत एव 'द्राघृ'धातोः अर्थस्वीकारे सायणाचार्यः आचार्यपाणिनेर्मतम् अनुसरति स्म।
क्षीरस्वामिना साकं सायणाचार्यस्य दिवादिगणीयडिङ्धातोः धात्वर्थविषये मतभेदः परिलक्ष्यते। डिङ्धातोः धात्वर्थविषये आसीत् क्षीरस्वामिपक्षसमर्थकः हेमचन्द्रः कातन्त्रधातुपाठकृत्। सामर्थ्यायामरूपार्थौ विहायापि 'द्राघृ'धातोर्बहवः अर्थाः सन्ति, तद्यथा दैर्घ्यकरणम्, यातनाप्रदानम्, शक्तिमत्त्वञ्चेति। 'द्राघृ'धातोरपि 'द्राघते', 'दद्राघे', 'द्राघिष्यते', 'अद्राघत', 'द्राघेत' चेत्यादीनि रूपाणि प्राप्यन्ते । 'द्राघृ'धातोः सनि 'दिद्राघिषते', यङि 'दाद्राघ्यते', णिचि च 'द्राधयति' इति एवंप्रकारेण रूपाणि भवन्ति।

**कुञ्चीशब्दाः –** धातुः, सायणः, क्षीरतरङ्गिणी, माधवीया धातुवृत्तिः, धात्वर्थः, वैसादृश्यञ्चेति।

**मूलप्रबन्धः**
वात-पित्त-कफाश्चेति त्रयः साकल्येनायुर्वेदशास्त्रे धातव इति उच्यते। शारीरकशास्त्रविदुषां नये धातुः सप्तविधः। ते च रसः, रक्तम्, मांसम्, मेदः, अस्थि, मज्जा, शुक्रश्चेति। तान्त्रिकनये तु हिरण्य-रजत-कांस्य-ताम्र-सीसकादिभेदेन धातुरष्टविधः। व्याकरणशास्त्रानुसारेण धातुस्त्रिविधः - परस्मैपदी, आत्मनेपदी, उभयपदी धातुश्चेति। प्रकारान्तरेण धातुर्द्विविधः – सकर्मकाकर्मकभेदात्। सेट्-निट्भेदेनापि धातू दृश्येते। शब्दशक्तिप्रकाशिकायाम्

आचार्यजगदीशतर्कालंकारेण उक्तं यद्धातुस्त्रिविधः, तद्यथा मलाधातुः, सौत्रधातुः, प्रत्ययान्तधातुश्चेति। तथाहि उच्यते-

'मूलधातुर्गणोक्तोसौ सौत्रः सूत्रैकदर्शितः।
योगलभ्यार्थको धातुः प्रत्ययान्तः प्रकीर्तितः'[1]।।

ननु को नाम धातुः? कातन्त्रस्याख्यातप्रकरणे धातुलक्षणप्रसङ्गविषये चोक्तम् - "क्रियाभावो धातुः"[2]। सारस्वतव्याकरणे चन्द्रकीर्तिटीकायां धातुलक्षणप्रसङ्गे प्रोक्तम् - "दधात्यर्थमिति धातुः"[3]। ननु धातोः का प्रकृतिः कश्चार्थः? अर्थात् को नाम धात्वर्थः? धात्वर्थविषये शास्त्रकाराणां मतवैषम्यं दृश्यते। फलमेव धात्वर्थः इति मीमांसकाः। फलं व्यापारश्च धात्वर्थः इति नव्यनैयायिकाः। अपि च, फलावच्छिन्नव्यापार एव धात्वर्थः इति द्विविधं मतं नव्यनैयायिकानाम्। प्राचीनास्तु धातुव्यापारे शक्तिं स्वीकुर्वन्ति, न तु धातुफलम्। तथाहि उक्तम् आचार्यजगदीशतर्कालंकारेण - "प्राञ्चस्तु ग्रामं गच्छति त्यजतीत्यादौ क्रियामात्रं धात्वर्थः"[4]। प्राचीनवैयाकरणाः फलं व्यापारञ्च धात्वर्थत्वेन प्रतिपादयन्ति। नव्याश्च फलविशिष्टव्यापारे व्यापारविशिष्टफले च धातोः शक्तिं स्वीकुर्वन्ति। धात्वर्थनिर्णयार्थे आचार्यकौण्डभट्टेन वैयाकरणभूषणसारस्यादौ उक्तम्-

"फलव्यापारयोर्धातुराश्रये तु तिङः स्मृता।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्"[5]।।

क्षीरतरङ्गिण्यां माधवीयाधातुवृत्तौ चात्मनेपदिधात्वर्थे तु कश्चिद्भेदः परिलक्ष्यते। आचार्यसायणस्तु "राघृ-लाघृ-द्राघृ-सामर्थ्ये" इति धातुसूत्राद् अव्यवहितमनन्तरमेव "द्राघृ आयामे च"[6] इति धातुसूत्रस्य पाठं कृतवान्। "द्राघृ आयामे च" इति धातुसूत्रस्थस्य चेति शब्देन पूर्वधातुसूत्रस्थितसामर्थरूपधात्वर्थो द्योत्यते। अर्थात् भ्वादिगणीयाद् आत्मनेपदिद्राघृधातोः सामर्थ्यम् आयामश्चेत्यर्थः। पाणिनीयधातुपाठे "राघृ लाघृ द्राघृ सामर्थ्ये । ध्राघृ इत्यपि केचित्। द्राघृ आयामे च"[7] इत्याकारेणापि पाठः प्राप्यते। अत एव 'द्राघृ'धातोः अर्थस्वीकारे सायणाचार्यः आचार्यपाणिनेर्मतम् अनुसरति स्म। 'द्राघृ'धातोः सामर्थ्यायामार्थौ च 'धात्वर्थप्रकाशिका'टीकायामुक्तौ - "सामर्थ्य-पराक्रमः", "आयामः दैर्घ्यम्"[8]। "द्राघृ आयामे च" इति सूत्रस्य भाष्यव्याख्याने आयामपदस्यार्थविषये आचार्यकौशिकमतमुद्धृत्य सायणः कथयति, "आयमो दैर्घ्यक्रियेति कौशिकः" इति। क्षीरस्वामी अपि आचार्यकौशिकमनुसृत्य कथयति - "कौशिकस्त्वायामे, दैर्घ्यविशिष्टायां क्रियायामित्याख्यात्"[9]। भट्टोजिदीक्षितमते तु "आयामो दैर्घ्यम्"[10]। बालमनोरमायां चायामपदस्यार्थप्रसङ्गे उदितम् – "आयामो दीर्घीभवनम्"। मैत्राचार्योऽपि 'द्राघृ'धातोः सामर्थ्यम् आयामश्चेति अर्थद्वयं स्वीकृतवान्। "राघृ लाघृ द्राघृ सामर्थ्ये"[11] इति धातुसूत्रस्य व्याख्यायाम् आचार्यमैत्राचार्यः कथयति "द्राघृ आयामे च" ।। पक्षान्तरेण क्षीरस्वामिना भ्वादिगणीयात्मनेपदिद्राघृधातोः सामर्थ्यायासौ धात्वर्थत्वेन स्वीकृतौ। "राघृ लाघृ द्राघृ ध्राघृ सामर्थ्ये" इति धातुसूत्राद् अव्यवहितपरमेव क्षीरस्वामी "द्रघृ

---

1. शास्त्री, धुनधिराजः (2013), (सम्पा.), शब्दशक्तिप्रकाशिका, चौखम्बा प्रकाशन, श्लोक-58. पृ. 281 (पञ्चमसंस्करणम्)

2. Eggeling, Julius, (1874), (ed.), The Katantra, Asiatic of Bengal, (3.1.9, p-155)

3. शास्त्री, नवकिशोरः, (2005), (सम्पा), सारस्वत-व्याकरणम् (उत्तरार्धः), चौखम्बा संस्कृत संस्थान, पृ. 2 (तृतीयसंस्करणम्)

4. शास्त्री, धुनधिराजः (2013), (सम्पा.), शब्दशक्तिप्रकाशिका, चौखम्बा प्रकाशन, पृ. 322 (पञ्चमसंस्करणम्)।

5. द्विवेदी, चन्द्रिकाप्रसादः (1983), (सम्पा.) वैयाकरणभूषणसारः, चौखम्बा संस्कृत प्रतिष्ठान, श्लोकः 2, पृ. 6 (पुनर्मुद्रितं संस्करणम्)।

6. शास्त्री, स्वामी द्वारिकादासः, (1983), (सम्पा.), माधवीया धातुवृत्तिः, तारा बुक एजेन्सी, भ्वादिः 81, पृ.80।

7 (सम्पादकः अनुल्लिखितः), (1969), धातुपाठः (धात्वर्थप्रकाशिकाटिप्पणीसमलङ्कृता), चौखम्बा संस्कृत सिरिज् अफिस, भ्वादिः 112-114, पृ. 4 (द्वितीयसंस्करणम्)।

8 (सम्पादकः अनुल्लिखितः), (1969), धातुपाठः (धात्वर्थप्रकाशिकाटिप्पणीसमलङ्कृता), चौखम्बा संस्कृत सिरिज् अफिस, पृ. 4 (द्वितीयसंस्करणम्)।

9. मीमांसकः, श्रीपण्डितयुधिष्ठिरः, (2014 संवत्), क्षीरतरङ्गिणी, रामलाल कपूर ट्रास्ट, पृ. 31।

10. शर्मा, गिरिधरः परमेश्वरानन्दः शर्मा च, (2005), (सम्पा.), वैयाकरणसिद्धान्तकौमुदी, मोतिलाल वनारसीदास, भ्वादिः, पृ. 103।

11. चक्रवर्ती, श्रीचन्द्रः, (1919), (सम्पा.), धातुप्रदीपः, द्य वरेन्द्र रिसार्च सोसाइटि, भ्वादिः 110-112, पृ.17।

आयासे च”[12] इति धातुसूत्रस्य पाठं कृतवान्। उक्तस्थलेऽपि “द्राघृ आयासे च” इति धातुसूत्रस्थितस्य चपदेन अव्यवहितपूर्ववर्तिधातुसूत्रस्थितसामर्थ्यरूपधात्वर्थो बोध्यः। क्षीरस्वामिपक्षं समर्थयति आचार्यः हेमचन्द्रः। आचार्यहेमचन्द्रः- “द्राघृङ् आयासे च”[13] इति धातुसूत्रस्य व्याख्याने उक्तवान् - “चाकारात्सामर्थ्ये” इति। क्षीरतारङ्गिणीकारः हैमधातुपरायणकारश्चेति स्वस्वग्रन्थयोः द्राघृधातोः आयासरूपधात्वर्थविषये उक्तम् - “आयासः कदर्थनम्” इति । कातन्त्रधातुपाठे अपि सामर्थ्यार्थे आयासार्थे च द्राघृधातोः पाठः प्राप्यते - “राघृ लाघृ सामर्थ्ये”, “द्राघृ आयासे च”[14] इति ।

सामर्थ्यायामरूपार्थौ विहायापि ‘द्राघृ’धातोर्बहवः अर्थाः सन्ति, तद्यथा दैर्घ्यकरणम्, यातनाप्रदानम्, शक्तिमत्त्वश्चेति। ‘द्राघृ’धातोरपि ‘द्राघते’, ‘दद्राघे’, ‘द्राघिष्यते’, ‘अद्राघत’, ‘द्राघेत’ चेत्यादीनि रूपाणि प्राप्यन्ते । ‘द्राघृ’धातोः सनि ‘दिद्राघिषते’, यङि ‘दाद्राघ्यते’, णिचि च ‘द्राघयति’ इति एवंप्रकारेण रूपाणि भवन्ति। णिच्प्रत्ययान्तस्य च प्रयोगः ‘भट्टिकाव्ये’ प्राप्यते। तद्यथा-

“तृणोह्मि देहमात्मीयं त्वं वाचं न ददासि चेत्।
द्राघयन्ति हि मे शोकं स्मर्यमाणा गुणास्तव”[15]।। इति

उक्तश्लोकविषये जयमङ्गलटीकायामुक्तम् – “द्राघयन्ति दीर्घं कुर्वन्ति”।

दिवादिगणीयादात्मनेदिडीङ्धातोः निमित्ते आचार्येण पाणिनिना “डीङ्विहयसा गतौ”[16] इति धातुसूत्रं पठितम्। माधवीयाधातुवृत्तिकारेणापि अनुरूपो धातुपाठः पठितः - “डीङ् विहायसा गतौ”[17] इति। आचार्यभट्टोजिदीक्षितेनापि डीङ्धातोः अर्थरूपेण “विहायसा गतौ”[18] इत्यर्थः स्वीकृतः। सारस्वतव्याकरणेऽपि “डीङ् विहायसा गतौ”[19] इति धातुसूत्रस्य पाठः प्राप्यते। डीङ्धातोः धात्वर्थः विहायसा गतौ इति। अस्यार्थश्च आकाशे उड्डयनपूर्वकं गमनम् इति। किन्तु आचार्यक्षीरस्वामी गत्यर्थे एव दिवादिगणीयादात्मनेपदिडीङ्धातोः पाठं करोति “डिङ् गतौ”[20] इति।

अतः क्षीरस्वामिना साकं सायणाचार्यस्य दिवादिगणीयडिङ्धातोः धात्वर्थविषये मतभेदः परिलक्ष्यते। डिङ्धातोः धात्वर्थविषये आसीत् क्षीरस्वामिपक्षसमर्थकः हेमचन्द्रः कातन्त्रधातुपाठकृत्। “डीङ् च गतौ”[21] धातुसूत्रस्य व्यख्याने उक्तम् – “अयमपि विहयसां गतावित्यन्ये । डीङ् विहायसां गतौ” । क्षीरस्वाम्याद्याचार्याणां मते, डीङ्धातोः अर्थो गतिरिति। गतिपदस्य शक्यार्थः गमनमिति। बलाकः डीयते इत्यस्मिन्वाक्ये डीङ्धातोः शक्यार्थः भूमौ बलाकायाः पद्भ्यां गमनमिति। किन्तु ‘बलाहकः डीयते’ इति वाक्ये डीङ्धातोः शक्यार्थः स्वीक्रियते चेत् वाक्यार्थबोधो न भवति। कारणं यदस्य मेघे द्विपदयुक्तप्राणिनां गमनं न सम्भवति। वक्ता यदि ‘बलाकः डीयते’ इत्यनेन वाक्येन बलाकायाः आकाशे उड्डयनं बोधयितुमिच्छति, तर्हि क्षीरस्वामिना स्वीकृतः डीङ्धातोः धात्वर्थो बाध्यते। परन्तु ‘बलाकः डीयते’ इति वाक्ये तात्पर्यज्ञानस्वीकारेण क्षीरस्वामिसम्मतात् डीङ्धातोः धात्वर्थो गृह्यते चेत् बलाकायाः गगने उड्डयनरूपार्थो बोधितो भवति। पक्षान्तरेण च सायणाचार्यादिवैयाकरणैः स्वीकृतात् डीङ्धातोः अर्थः ‘विहायसा गतौ’ इति। अतः अस्मिन्स्थले शक्यार्थो भवति आकाशे उड्डयनं कृत्वा गमनमिति। अतः ‘बलाहकः डीयते’ इति वाक्ये मेघस्य आकाशे उड्डयनपूर्वकं गमनरूपार्थो बोध्यते। ‘बलाकः डीयते’ इत्यनेन वाक्येन बालाकायाः आकाशे उड्डयनपूर्वकं गमनरूपार्थो ज्ञायते।

12. मीमांसकः, श्रीपण्डितयुधिष्ठिरः, (2014 संवत्), क्षीरतरङ्गिणी, रामलाल कपूर ट्रास्ट, भ्वादिः 80, पृ. 31।

13. क्रिष्टे, जो, (1901), (सम्पा.), हैमधातुपारायणम्, एडुकेशन सोसाइटि प्रेस्, भ्वादिः 644, पृ. 78।

14. भट्टाचार्यः, गुरुनाथविद्यानिधिः, (2007), (सम्पा.), गणार्थकल्पद्रुमः तथा गणप्रदीपः, कातन्त्रधातुपाठः, सदेश, भ्वादिः, पृ. 7।

15. भट्टिकाव्यम् (18.33)

16. (सम्पादकः अनुल्लिखितः), (1969), धातुपाठः (धात्वर्थप्रकाशिकाटिप्पणीसमलङ्कृता), चौखम्बा संस्कृत सिरिज् अफिस, दिवादिः 1135, पृ. 32 (द्वितीयसंस्करणम्)।

17. शास्त्री, स्वामी द्वारिकादासः, (1983), (सम्पा.), माधवीया धातुवृत्तिः, तारा वुक एजेन्सी, दिवादिः 26, पृ. 410।

18. डीङ्विहयसा गतौ, वैयाकरणसिद्धान्तकौमुदी (दिवादि -1135)

19. शास्त्री, नवकिशोर(2005),(सम्पा.), सारस्वत-व्याकरणम्(उत्तरार्धः), चौखम्बा संस्कृत संस्थान, दिवादि, पृ. 73,(तृतीयसंस्करणम्)

20. मीमांसक, श्रीपण्डित युधिष्ठिर,(2014 संवत्), क्षीरतरङ्गिनी, रामलाल कपूर ट्रास्ट, दिवादि 25, पृ. 202।

21. क्रिष्टे, जो, (1901), (सम्पा.), हैमधातुपारायणम्, एडुकेशन सोसाइटि प्रेस्, दिवादिः 106, पृ. 187

अवपूर्वकात् डीङ्धातोः अर्थः आकाशात् अवतरणमिति। उत्पूर्वकात् डीङ्धातोरर्थः उपरि उड्डयनम् इति। वायौ उड्डयनार्थकस्य द्योतकः धातुरयम् । यथा-

"अयमेत्य तडाकनीडजैर्लघुपर्यव्रियताथ शङ्कितैः।
उद्डीयत वैकृतात्करग्रहजादस्य विकस्वरस्वरैः"22।।

सम्पूर्वकात् डीङ्धातोः समूहेन उड्डयनम् इत्यर्थः। सम्पूर्वकादुत्पूर्वकाच्च डीङ्धातोः शनैः शनैः उड्डयनमित्यर्थः। परिपूर्वकात् डीङ्धातोः अर्थः चक्राकारेण उड्डयनम् इति। प्रपूर्वकात् डिङ्धातोः चापल्येन उड्डयनम् इति। यथा-

"संसक्तैरिव चक्रवाकमिथुनैर्हंसैः प्रडीनैरिव
व्याविद्धैरिव मीनचक्रमकरैर्हर्म्यैरिव प्रोच्छ्रितैः"23।।

चुरादिगणीयात्मनेपदिनः विद्धातोः निमित्तार्थे "विद चेतनाख्याननिवासेषु" 24 इति धातुसूत्रपाठः आचार्येण पाणिनिना कृतः। माधवीया-धातुवृत्तिः इति ग्रन्थस्य चुरादिगणेऽपि "विद चेतनाख्याननिवासेषु" 25 इति धातुसूत्रपाठः उपलभ्यते। अर्थात् आचार्यपाणिनिः सायाणाचार्यश्च चेतनार्थे आख्यानार्थे निवासार्थे च चुरादिगणीयात्मनेपदिनः विद्धातोः पाठं कृतवन्तौ। हैमधातुपारायणग्रन्थे विषये अस्मिन् सायणपक्षस्य समर्थनं प्राप्यते। "विदिण् चेतनाख्याननिवासेषु" 26 इति आचार्यहेमचन्द्रेण धातुसूत्रं पठितम्। किन्तु क्षीरतरङ्गिणीग्रन्थे चुरादिगणे आचार्यक्षीरस्वामिना "विद चेतनाख्यानविवादेषु"27 इति धातुसुत्रं पठितम्। अत एव उक्तविद्धातोः प्रथमद्वितीयधात्वर्थविषये यद्यपि आचार्यसायणस्य क्षीरस्वामिनो मतसादृश्यं दृश्यते, तथापि तृतीयधात्वर्थस्वीकारे वैसादृश्यं परिदृश्यते।
कश्चित् बौद्धविद्वान् मैत्राचार्यस्य चुरादिगणीयाद्विद्धातोः वेदानाख्याननिवासरूपार्थत्रयं स्वीकृतवान् - "विद वेदनाख्याननिवासेषु" 28 इति। कातन्त्रधातुपाठे अपि वेदनाद्युक्तत्रयधात्वर्थाः स्वीकृताः। चुरादिगणीयाद्विद्धातोः निमित्तं "विद वेदनाख्याननिवासेषु" 29 इति पाठः। जनार्दनहेगडे-महाशयस्य मते - "विद वेदनाख्यानपरिवादनेषु इति न्यासे पाठः"30 इति । उक्तार्थः विहायापि अनुभवार्थे निश्चलार्थे बोधयनार्थे च चुरादिगणीयाद्विद्धातोः प्रयोगो भवति। प्रीतिपूर्वकात् विद्धातोः प्रदानार्थे अर्पणार्थे च प्रयोगो भवति धातोरस्य। चुरादिगणीयाद्विद्धातोः 'वेदयते' इति रूपं भवति। अदादिगणीयाज् ज्ञानार्थकात् परस्मैपदिविद्धातोः 'वेत्ति' रूपं भवति। दिवादिगणीयात्मनेपदसत्तार्थकाद्विद्धातोः 'विद्यते" इति रूपम्। तुदादिगणीयाल्लाभार्थकोभयपदिविद्धातोः 'विन्दति', 'विन्दते' च इत्यादिनि रुपाणि भवन्ति। रुधादिगणीयविचारणार्थकात्मनेपदविद्धातोः 'विन्ते' इति रूपम्। श्रीमद्वासुदेवदीक्षितेन बालमनोरमायामुक्तं विद्धातोरर्थभेदे विकरणभेदं संगृह्णाति। विद्धातोः अर्थभेदात् विकरणभेदार्थप्रदर्शनावसरे भट्टोजिदीक्षितः कथयति-

"सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे ।
विन्दते विन्दति प्राप्तौ श्यण्लुक्-श्नम्शेष्विदं क्रमात्"31।। इति।

**ग्रन्थपञ्जी**


1. कातन्त्रव्याकरणम्, (सम्पा.) जुलियास् -एगलिङ्गस्, एशियाटिक् सोसाइटि अफ् वेङ्गल, कलकाता, 1847।
2. क्षीरतरङ्गिणी (क्षीरस्वामी), (सम्पा) युधिष्ठिरमीमांसकः, रामलाल कापूर ट्रास्ट, अमृतसरः, 2014 (संवत्)।
3. धातुरूपनन्दिनी (सम्पा) - जनार्दनहेगडे, संस्कृतभारती, नइदिल्ली,2013।
4. भट्टिकाव्यम् (भट्टिः) (सम्पा.) - विनायकशास्त्री लक्ष्मणशास्त्री-पनशीकारश्चेति, पाण्डुरङ्ग-जावजी, मुम्बाइ, 1934 (अष्टमसंस्करणम्)।


22. नैषधीयचरितम् (2.5)

23. मृच्छकटिकम् (5.5)

24 (सम्पादकः अनुल्लिखितः), (1969), धातुपाठः (धात्वर्थप्रकाशिकाटिप्पणीसमलङ्कृता), चौखम्बा संस्कृत सिरिज् अफिस,दिवादिः1708,पृ.46(द्वितीयसंस्करणम्)।

25. शास्त्री, स्वामी द्वारिकादासः, (1983), (सम्पा.), माधवीया धातुवृत्तिः, तारा वुक एजेन्सी, चुरादिः 152, पृ. 555।

26. क्रिष्टे, जो, (1901), (सम्पा.), हैमधातुपारायणम्, एडुकेशन सोसाइटि प्रेस्, चुरादिः 242, पृ. 269

27. मीमांसकः, श्रीपण्डितः युधिष्ठिरः, (2014 संवत्), क्षीरतरङ्गिणी, रामलाल कपूर ट्रास्ट, चुरादिः 154, पृ. 296।

28. चक्रवर्ती, श्रीचन्द्रः (1919), (सम्पा), धातुप्रदीपः, द्य वरेन्द्र रिसार्च सोसाइटि, चुरादिः 167, पृ. 139

29. भट्टाचार्यः, गुरुनाथविद्यानिधिः, (2007), (सम्पा.), गणार्थकल्पद्रुमः तथा गणप्रदीपः, कातन्त्रधातुपाठः, सदेश, चुरादिः, पृ. 23

30. हेगडे, जनार्दनः (2013), धातुरूपनन्दिनी, संस्कृतभारती, पृ. 380 (द्वितीयसंस्करणम्)।

31. शर्मा, गिरिधरः परमेश्वरानन्दः शर्मा, (2005), (सम्पा.), वैयाकरणसिद्धान्तकौमुदी, मोतिलाल वनारसीदास, चुरादिप्रकरणम्, पृ. 399।

5. माधवीया धातुवृत्तिः (सायणः) (सम्पा.) - द्वारिकादासशास्त्री, तारा वुक् एजेन्सी, वाराणसी,1983।
6. वैयाकरणसिद्धान्तकौमुदी (भट्टोजिदीक्षितः) (तृतीयभागः) (सम्पा.) - शर्मा तथा च शर्मा, मतीलाल वनारसी दास, दिल्ली, 2005।
7. सारस्वतव्याकरणम् (उत्तरार्धः) (सम्पा.) - नवकिशोरशास्त्री, चौखाम्बा संस्कृतसंस्थान, वाराणसी, 2005।
8. हैमधातुपरायणम् - (सम्पा.) जो किर्ष्टे, एडुकेशान सोसाइटि-प्रेस, वोम्बे, 1901।
9. गणप्रदीपः तथा गणार्थः – कल्पद्रुमः – (सम्पा.) गुरुनाथविद्यानिधिभट्टाचार्यः, सदेश, कोलकाता, 2007।
10. धातुपाठः (धात्वर्थप्रकाशिका टिप्पणीसमलंकृता) (सम्पादकः अनुल्लिखितः), चौखाम्वा संस्कृत सिरिज अफिस्, वाराणसी, 1969 (द्वितीयं संस्करणम्)।
11. शब्दशक्तिप्रकाशिका – (सम्पा.) धनुधिराजशास्त्री, चौखाम्बा प्रकाशन, वाराणसी, 2013 (पञ्चमं संस्करणम्)।